## वेरपृक्तस्य । (६७/३७८)

लोपः इति वर्तते । वेः इति क्विबादयो विशेषाननुबन्धानुत्सृज्य सामान्येन गृह्यन्ते । वेरपृक्तस्य लोपो भवति । 'ब्रह्मभ्रूणवृत्रेषु क्विप्' (३.२.८७/२९९८) । ब्रह्महा । [1]भ्रूणहा । 'स्पृशोऽनुदके क्विन्' (३.२.५८/४३२) । घृतस्पृक् । [2]तैलस्पृक् । 'भजो ण्विः' (३.२.६२/२९७६) । अर्धभाक् । पादभाक् । [3]तुरीयभाक् । अपृक्तस्य इति किम् ? वृदृभ्यां क्विन्' (उ. ५०२) दर्विः । 'कॄगॄशॄदॄजागृभ्यः क्वि' । जागृविः ॥

## हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । (६८/२५२)

लोप इति वर्तते । तदिह लौकिकेनार्थवत् [4]कर्मसाधनं द्रष्टव्यम् । लुप्यते इति लोपः । हलन्ताद्, ङ्यन्ताद् आबन्ताच् च दीर्घात् [5]परं सु ति सि इत्येदपृक्तं हल् लुप्यते । हलन्तात् सुलोपः – राजा । तक्षा । उखास्रत् । पर्णध्वत् । ङ्यन्तात् – कुमारी । [6]गौरी । शार्ङ्गरवी । आबन्तात् – खट्वा । बहुराजा । कारीषगन्ध्या ।

हलन्तादेव तिलोपः [7]सिलोपश्च । तत्र तिलोपस्तावत् – अबिभर् भवान् । भृञो लङि तिपि श्लौ 'भृञामित् (७.४.७६/२४९६) इत्यभ्यासस्य इत्त्वम् । अजागर् भवान् । सिलोपः-अभिनोऽत्र । अच्छिनोऽत्र (म.भा. ३.४३) । दस्य रेफः ।

हल्ङ्याब्भ्यः इति किम् ? ग्रामणीः । [8]सेनानीः । दीर्घात् इति किम् ? निष्कौशाम्बिः । अतिखट्वः । सुतिसि इति किम् ? अभैत्सीत् । तिपा सहचरितस्य सिशब्दस्य ग्रहणात् सिचो ग्रहणं [9]नास्ति । [10]अपृक्तम् इति किम् ? भिनत्ति । छिनत्ति । हलि इति किम् ? बिभेद । चिच्छेद ।

अथ किमर्थं हलन्तात् सुतिसीनां लोपो विधीयते, संयोगान्तलोपेनैव [11]सिद्धम् ? न सिध्यति । राजा, तक्षा इत्यत्र संयोगान्तलोपस्यासिद्धत्वान् नलोपो न स्यात् । उखास्रत्, पर्णध्वत् इत्यत्र अपदान्तत्वाद् दत्त्वं च न स्यात् । अभिनोऽत्र इत्यत्र 'अतो रोरप्लुतादप्लुते' (६.१.११३/१६३) इत्युत्वं न स्यात् । अबिभर् भवान् इत्यत्र तु 'रात् सस्य' (८.३.२४/२८०) इति नियमाल् लोप एव न स्यात् ।

संयोगान्तस्य लोपे हि नलोपादिर्न सिध्यति ।
रात्तु ते नैव लोपः स्याद् धलस्तस्माद् विधीयते ॥

## एङ् ह्रस्वात् सम्बुद्धेः । (६९/१९३)

लोपः इति वर्तते, हल् इति च । अपृक्तम् इति नाधिक्रियते, [12]तथा च पूर्वसूत्रे [13]पुनरपृक्तग्रहणं [14]कृतम् । एङन्तात् प्रातिपदिकात् ह्रस्वान्ताच्च परो हल् लुप्यते स चेत् सम्बुद्धेर्भवति । एङन्तात् – हे अग्ने । हे वायो । ह्रस्वान्तात् – हे देवदत्त । हे नदि । हे वधु । हे कुण्ड । कुण्डशब्दात् 'अतोऽम्' (७.१.२४/३०९) इति अम् । 'अमि पूर्वः' (६.१.१०७/१९४) इति पूर्वत्वे कृते हल्मात्रस्य मकारस्य लोपः । हे कतरत् इत्यत्र डिदयम् अद्डादेशः (७.१.२५/३१५), तत्र टिलोपे सति ह्रस्वाभावान् नास्ति [15]सम्बुद्धिलोपः । एङ्ग्रहणं क्रियते सम्बुद्धिगुणबलीयस्त्वात् ॥

---

1. वृत्रहा क. ड. फ. 2. तैलस्पृक् नास्ति फ, दधिस्पृक्, जलस्पृक् ह. 3. तुरीयभाक् नास्ति क. फ. 4. कर्मणि साधनं फ. 5. उत्तरं फ. 6. शाङ्कली क, किशोरी ह, शार्ङ्गरवी नास्ति फ. 7. सलोपः ह. 8. सेनानीः नास्ति फ. 9. न भवति फ. 10. अपृक्तः क. 11. सिध्यति फ. 12. तथा च – भवति नास्ति फ. 13. हि इत्यधिकम् ब. 14. क्रियते क. 15. सम्बुद्धेः लोपः ब.क.फ.